तस्य वाहनं वाजी दुर्लब्ध्यं वाजिवाञ्छितम् । दृढासनोऽथ तत्त्वज्ञो जितश्रमो निरालसः । अविरागी स्थिरश्चापि षडेते वाजिवाहकाः । चित्तं यो नैव जानाति तुरगस्य समासतः । न वहन्ति हयास्तस्य दण्डपातेन ताडिताः । हेषिते वलिते भीते तथा चोन्मार्गगामिनि । कुपितोद्भ्रान्तचित्ते वा षट्सु दण्डं निपातयेत् । हेषिते ताडयेन्मूर्द्ध्नि जानुभ्यां वलिते तथा । क्रुद्धे उरसि हन्तव्यो भ्रान्तचित्ते तथोदरे । भीतं च ताडयेत्पश्चान्मुखे चोन्मार्गगामिनम् । ज्ञात्वा दोषं च रूपं च स्थानेष्वेतेषु ताडयेत् । अस्थानताडितोवाजी यावज्जीवं न सिध्यति । नो जहाति च तद्दोषं यावज्जीवत्यसौ हयः । धाराः पञ्च प्रवक्ष्यामि मुनिभिर्याः प्रकीर्त्तिताः । प्रथमा विक्रमा धारा द्वितीया पुलका स्मृता । तृतीया पूर्णकण्ठी तु चतुर्थी त्वरिता स्मृता । पञ्चमी चैव या धारा निरालम्बा प्रकीर्त्तिता । षष्ठी चैव तु या धारा श्रूयते न तु दृश्यते । विक्रमा गतिधारा च चतुष्का पुलका मता । सुखपादसमायुक्ता पूर्णकण्ठी तु सा भवेत् । स्वेच्छया त्वरिता धारा ताडिता चैव पञ्चमी । षष्ठी चैव तु या धारा स्वर्गलोकेषु गीयते । वल्गाश्च संप्रवक्ष्यामि मुनिभिः परिकीर्त्तिताः । पुष्पवन्ती च गोकर्णी तूलोत्तुला तुला दृषा । नागखण्डी पुष्पधारी दुस्ट्री च स्तनस्तनी । द्विहस्ती चैकहस्ती च सुभगा शोभना मता । दूलेता द्वादश वल्गा मुनिभिः परिकीर्त्तिताः" "आरूढकर्णमध्ये तु मनो लगति वाजिनः" शनैस्तु वाहयेत्पूर्व्वं पशुतुल्यं समादिशेत् । न वक्रो न तथोत्तानो न कुब्जो नाप्यधोमुखः । न भवेत्स्तब्धगात्रस्तु स भवेदश्ववाहकः । स्थिरोरुः स्थिरपादश्च त्रिकोन्नतस्थिरासनः । दक्षिणादितुरङ्गस्य चासने तु दृढः सदा । अश्ववाराः समाख्याताः शेषास्तु भयदायकाः । ग्रीष्मादिषु न वर्त्तव्यस्तत्तु त्रिषु वाहनम् । हेमन्तादिषु वर्त्तव्यं सादिभिः शास्त्रवेदिभिः । प्रतिपत्सु त्रयोदश्यां पञ्चम्यां वा सिते दले । इतिसिद्धातियोगेषु वासरे चन्द्रसूर्य्ययोः । मूलरोहिणीहस्तेषु पुष्ये चैवोत्तरासु च । एवंविधे दिने सादी वाहान् संवाहयेत् शुभे । रङ्गभूमौ च रेवन्तं स्थापयेत् पूजयेत्ततः । पुष्पैर्धूपैः प्रदीपैस्तु चन्दनैः पायसैस्तथा । पक्वान्नैः पञ्चशब्दैश्च प्रातःशुचिसुवाससा । रक्ताम्बरधरोभूत्वा रक्तपुष्पधरस्तथा" । "एकविंशतिवारांश्च ततः पर्य्याणयेद्धयम् । क्षौममेकं तमारुह्य नयेच्छिक्षां शनैःशनैः । वल्गाग्रहश्च कर्त्तव्यः सव्यापसव्यमेव च । विक्रमा पुलका पूर्णकण्ठी च त्वरिता तथा । खलीनादौ प्रयोक्तव्या सादिना वाजिनां क्रमात् । नातिस्थूलं नातिकृशं न स्तब्धं नातिकर्कशम् । सप्ताङ्गुलप्रमाणन्तु खलीनं कारयेद्बुधः । खलीनादिषु लोहेषु धारयेद्विक्रमादिषु । क्रमेणैव तुरङ्गाणां कटानि संप्रयोजयेत् । खलीनादौ तु धारासु यदा सुशिक्षितो हयः । तदा कटेषु तं सादी भ्रामयेद्विक्रमादिभिः । शतहस्तादिकां भूमिं सप्तहस्तावसानिकाम् । भ्रामयेद्वाजिनं सादी सव्यं चैवापसव्यकम् । मण्डलं चतुरस्रं च गोमूत्रं चार्द्धचन्द्रकम् । नागपाशं क्रमेणैव भ्रामयेत्कटपञ्चकम् । एवमन्येषु लोहेषु त्रिष्वेव भ्रामयेत्कटे । यएवं वाहयेद्वाहं तस्य कष्टं न जायते । दद्यादभयमभीतस्य भीतस्यापि हरेद्भयम् । रहस्यं सादिनामेतद्वाहनेऽस्मिन्निवेदितम् । पूर्वोक्तेषु च देशेषु षट्सु देशेषु ताडयेत् । न जातु सादिनान्यस्मिन् काले दोषशतैरपि । दृश्यमानस्य अश्वस्य यो दोषः सादिदोषतः । जायते ऽसौ निराकर्त्तुं सादिना नैव शक्यते । एवं शास्त्रविधानेन यः सादी वाहयेद्धयान् । हयास्तस्य सिध्यन्ति भवन्ति फलदायकाः । वाहनं यच्च दुष्टं च धूपलेपनमन्त्रकैः । तदहं संप्रवक्ष्यामि मुनिभिः कीर्त्तितं यथा । अस्थिभिर्दशनैश्चैव हकाणां च यथा बुधैः । विषमच्छिकादंष्ट्राभिः धूमसंबद्ध सर्पिषा । एलागुरुमदोशीरनागकेसरचन्दनैः । सर्ज्जिकातैलसंयुक्तो धूपयेद्दुष्टवाजिनम् । विषलोहगदैलाभिस्तैलाज्यदधिचन्दनैः । निःशेषदोषनाशाय धूप उक्तो हि वाजिनाम् । विलिप्य गोमयैः प्रातर्न्निशीथे सर्वसन्धिषु । अष्टम्यां च विशेषेण दुष्टाः सिध्यन्ति धूपिताः । काशीशं चन्दनं कौतीसिद्धार्थमरिचानि च । सैन्धवं बड़वामूत्रं गोमूत्रं कर्णजं मलम् । मुनिगुप्तानि पिष्टानि कणायाः स्वचानि च । अञ्जनं सर्वदुष्टानां देयं पर्वणि पर्वणि । अनेनाभ्यञ्जितो वाजी निर्वाणमधिगच्छति । कोपमोहं भयं त्यक्त्वा वश्यः स्यात्सादिनोऽभयम्" ।

**अश्ववाह** पु० अश्वं वाहयति चालयति वह–णिच्–अण् । अश्वचालके सादिनि । ण्वुल् । अश्ववाहकोऽप्यत्र । ल्यु अश्ववाहनोऽप्यत्र पु० ।

**अश्वविक्रयिन्** त्रि० अश्वं विक्रेतुं शीलमस्य वि+क्री–शीलार्थे इनि ६त० । हयविक्रयाजीविकायुक्ते त्रिका० ।

**अश्वविद्** पु० अश्वं हयहृदयं वेत्ति विद–क्विप् ६त० । १नलन्पतौ तस्याश्वहृदयज्ञता वर्णिता" भा०व०प०७२अध्या० । यथा "ऋतुपर्णं प्रति बाहुकरूपस्य नलस्योक्तिः" "बाहुकस्तमु-